# Shri Chamunda Stotram 2

# શ્રીચામુણ્ડાસ્તોત્રમ્ ૨

## Document Information

Text title : Chamunda Stotram 2

File name : chAmuNDAstotram2.itx

Category : devii, durgA, devI

Location : doc_devii

Transliterated by : Gopal Upadhyay

Proofread by : Gopal Upadhyay

Description/comments : shrIskAnde nAgarakhaNDe

Latest update : February 18, 2019

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 24, 2021

*sanskritdocuments.org*

# શ્રીચામુણ્ડાસ્તોત્રમ્ ૨

શ્રીગણેશાય નમઃ ।
શ્રીભૈરવાય નમઃ ।
શ્રીઉમામહેશ્વરાભ્યાં નમઃ ।

જય સર્વગતે દેવિ ચર્મમુણ્ડધરે વરે ।
જય દૈત્યકુલોચ્છેદદક્ષે દક્ષાત્મજે શુભે ॥ ૧॥

કાલરાત્રિ જયાચિન્ત્યે નવમ્યષ્ટમિવલ્લભે ।
ત્રિનેત્રે ત્ર્યમ્બકાભીષ્ટે જય દેવિ સુરાર્ચિતે ॥ ૨॥

ભીમરૂપે સુરૂપે ચ મહાવિદ્યે મહાબલે ।
મહોદયે મહાકાયે જયદેવિ મહાવ્રતે ॥ ૩॥

નિત્યરૂપે જગદ્ધાત્રિ સુરામાંસવસાપ્રિયે ।
વિકરાલિ મહાકાલિ જય પ્રેતજનાનુગે ॥ ૪॥

શવયાનરતે રમ્યે ભુજઙ્ગાભરણાન્વિતે ।
પાશહસ્તે મહાહસ્તે રુધિરૌઘકૃતાસ્પદે ॥ ૫॥

ફેત્કારારવશોભિષ્ઠે ગીતવાદ્યવિરાજિતે ।
જયાનાદ્યે જય ધ્યેયે ભર્ગદેહાર્ધસંશ્રયે ॥ ૬॥

ત્વં રતિસ્ત્વં ધૃતિસ્તુષ્ટિસ્ત્વં ગૌરી ત્વં સુરેશ્વરી ।
ત્વં લક્ષ્મીસ્ત્વં ચ સાવિત્રી ગાયત્રી ત્વમસંશયમ્ ॥ ૭॥

યત્કિઞ્ચિત્ત્રિષુ લોકેષુ સ્ત્રીરૂપં દેવિ દૃશ્યતે ।
તત્સર્વં ત્વન્મયં નાત્ર વિકલ્પોઽસ્તિ મમ ક્વચિત્ ॥ ૮॥

યેન સત્યેન તેન ત્વમત્રાવાસં દ્રુતં કુરુ ।
સાન્નિધ્યં ભક્તિતસ્તુષ્ટા સુરાસુરનમસ્કૃતે ॥ ૯॥

સૂત ઉવાચ -

એવં સ્તુતા ચ સા દેવી નલેન પૃથિવીભુજા ।
પ્રોવાચ દર્શનં ગત્વા તં નૃપં ભક્તવત્સલા ॥ ૧૦॥

શ્રીદેવ્યુવાચ -
પરિતુષ્ટાઽસ્મિ તે વત્સ સ્તોત્રેણાનેન સામ્પ્રતમ્ ।
તસ્માદ્ગૃહાણ મત્તસ્ત્વં વરં મનસિ સંસ્થિતમ્ ॥ ૧૧॥

નલ ઉવાચ -
દમયન્તીતિ મે ભાર્યા પ્રાણેભ્યોઽપિ ગરીયસી ।
સા મયા નિર્જને મુક્તા વને વ્યાલગણાન્વિતે ॥ ૧૨॥

અખણ્ડશીલાં નિર્દોષાં યથાહં ત્વત્પ્રસાદતઃ ।
લભે ભૂયોઽપિ તાં દેવિ તથાત્ર કુરુ સત્વરમ્ ॥ ૧૩॥

સ્તોત્રેણાનેન યો દેવિ સ્તુતિં કુર્યાત્પુરસ્તવ ।
તત્રૈવ દિવસે તસ્મૈ ત્વયા દેયં મનોગતમ્ ॥ ૧૪॥

॥ ઇતિ શ્રીસ્કાન્દે નાગરખણ્ડે ચામુણ્ડાસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Gopal Upadhyay gopal.j.upadhyay at gmail.com

*Shri Chamunda Stotram 2*
pdf was typeset on December 24, 2021

Please send corrections to *sanskrit@cheerful.com*